# संस्कृत - विभागः

# राजकीय - महाविद्यालयः ठियोगः



ॐ सर्वे भवन्तु सुखिनः

सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःख भाग्भवेत्।

## " संस्कृत -संभाषणाभ्यासः

राजकीयमहाविद्यालये ठियोगे ६ /११/ २०२४ तमे दिनांके संस्कृतवार्तालापाभ्यासः आयोजितः। एषः कार्यक्रमः संस्कृतविभाग-सौजन्येन १०संख्याके कक्षे सम्पन्नः।

अस्मिन् अभ्यासे संस्कृतविभागस्य हिन्दीविभागस्य च छात्राः उत्साहेन सहभागिनः अभवन्। संस्कृतविभागस्य सहायकप्राध्यापिका डॉ. कमलेशकुमारी भाषणं दत्त्वा संस्कृतभाषायाः महत्त्वं प्रकाशयन्ती जगाद— "संस्कृतं जगतः प्राचीनतमा प्रमुखा च भाषा अस्ति।"
संस्कृतभाषायाः प्रयोजनं छात्राणां सौन्दर्यबोधस्य, कल्पनाशीलतायाः, चिन्तनक्षमतायाश्च विकासः अस्ति।





**"प्रश्नोत्तरीप्रतियोगिता"**

● २०/११/ २०२४ तमे दिनाङ्के राजकीयमहाविद्यालये ठियोगस्थे कक्षे दशमे संस्कृतविभागीयैः छात्रैः सह "प्रश्नोत्तरीप्रतियोगिता" आयोजिता ।यस्मिन् संस्कृतविभागस्य सर्वे छात्राः भागं गृहीतवन्तः ।

● प्रतियोगितायाः मुख्यविषयः आसीत् — "संस्कृतसाहित्ये नाटककाराः" ।

● अस्यां प्रतियोगितायां प्रथमस्थानं द्वितीयवर्षीय -छात्रया तनूजया प्राप्तम् , द्वितीयस्थानं च अंतिमवर्षीय -विद्यार्थी आशुतोष: लब्धवान्। कार्यक्रमस्य समापनं शांतिमंत्रपाठेन अभवत् ।।







***" गीता-जयंती "***

---

११ /१२/२०२४ तमे दिने राजकीय-महाविद्यालय-ठियोगस्य संस्कृतविभागेन "गीता-जयंती" इत्यस्य समारोहस्य आयोजनं कृतम्

गीता-जयंती मार्गशीर्ष- शुक्लपक्षस्य एकादश्यां तिथौ प्रतिवर्षम् उत्सव-रूपेण आचर्यते। अस्मिन् अवसरे मुख्य-अतिथिरूपेण प्राचार्यः डॉ. भूपेन्द्रसिंह-ठाकुर-महोदयाः उपस्थिताःआसन्। संस्कृतविभागस्य आचार्या डॉ. कमलेश-कुमारी प्राचार्य-महोदयानां स्वागतं कृतवती। ततः दीप-प्रज्वलनं सरस्वती-वन्दनां च कृत्वा कार्यक्रमस्य शुभारम्भः

अभवत् ।

छात्रैः मन्त्र-उच्चारणम्, श्लोक-उच्चारणम्, गीता-पाठः च प्रस्तुतः ।

अन्ते राष्ट्रीय-गानम् तथा शान्ति-मन्त्रः इत्यनेन सह कार्यक्रमस्य समापनं जातम् ।






**"संस्कृतभारती-आवासीयप्रबोधनवर्गः"**

०२/०१/ २०२५ तः ११ /०१/२०२५ पर्यन्तं शीतकालीनावकाशे संस्कृतभारती-हिमाचलप्रदेशस्य सौजन्येन आवासीयः प्रबोधनवर्गः गुरुकुलपब्लिक-विद्यालये सोलन-नगरे आयोजितः।

अस्मिन् प्रबोधनवर्गे संस्कृतविभागस्य सहायकाचार्या डॉ. कमलेशकुमारी तथा संस्कृतविभागस्य सर्वे छात्राः उपस्थिताः अभवन्।




**"पौधारोपणकार्यक्रमः"**

**दिनाङ्के १३ फरवरी २०२५ तमे संस्कृतविभागस्य छात्रैः महाविद्यालयपरिसरस्य चतुर्दिक्षु वृक्षाः पुष्पाणि च रोपितानि, अन्ते च सम्पूर्णपरिसरे स्वच्छता-कार्यक्रमः सम्पादितः।**

**अस्मिन् पौधारोपणे संस्कृतविभागस्य आचार्या डॉ. कमलेशकुमारी छात्रैः सह उपस्थितासीत्। सा छात्रान् प्रति अवदत् यत् "पौधारोपणस्य प्रयोजनं पर्यावरणस्य संरक्षणं संतुलनं च अस्ति।**

**एतत् शुद्धवायुम्, ऑक्सीजनं च ददाति, जलवायुपरिवर्तनं नियन्त्रयति।”़ “पौधारोपणं जैवविविधतां वर्धयति, जलसंरक्षणे च साहाय्यं करोति।”**





**“अन्त्याक्षरी-प्रतियोगिता”**

**दिनाङ्के २० फरवरी २०२५ तमे संस्कृतविभागस्य छात्रैः महाविद्यालयस्य सम्मेलनकक्षे सूत्र-अन्त्यायाक्षरी-प्रतियोगिता आयोजिता। अस्यां प्रतियोगायां संस्कृतविभागस्य द्वितीयतृतीयवर्षीयछात्राः सहभागिनोऽभवन् ।**

प्रतियोगितायाः निर्णायकपदं हिन्दीविभागाध्यक्षः डॉ. सत्यनारायणस्नेही महोदयः तथा संस्कृतविभागस्य सहायकाचार्या डॉ. कमलेशकुमारी निर्वहेताम् ।अस्यां प्रतियोगितायां तृतीयवर्षीया छात्रा महकनामधेया प्रथमस्थानं प्राप्तवती, द्वितीयवर्षीया छात्रा सान्या द्वितीयस्थानं प्राप।

शान्तिमन्त्रपाठेन प्रतियोगिता समापिता







**"कैरियर-परामर्श-कार्यक्रमः"**

दिनाङ्के ७ मार्च २०२५ तमे राजकीयमहाविद्यालये ठियोगे संस्कृतविभागस्य छात्राणा कृते कैरियर-परामर्श-कार्यक्रमः आयोजितः।

अस्मिन् परामर्शकार्यक्रमे संस्कृतविभागाध्यक्षया डॉ. कमलेशकुमार्या संस्कृताध्ययनरतान् छात्रान् प्रति संस्कृतविषये रोजगारपरकानां सम्भावनानां विषये प्रकाशः कृतः।

समानावसरे संस्कृतस्य महत्त्वं प्रतिपाद्य अस्याः प्राचीनतायाः वर्णनं च कृतं । संस्कृतं प्राचीनतमा भाषा इति जनजागरूकतां प्रसारयितुं, तस्य प्रचारं कर्तुं, पुनर्जीवनं च दातुं आह्वानं कृतम्।

